© UNIVERSAL RESEARCH REPORTS | REFEREED | PEER REVIEWED
ISSN : 2348 - 5612 | Volume : 10 , Issue : 04 | October - December 2023

# पाणिनिकृत–अष्टाध्याय्यां धर्मदर्शनस्य विवेचनम्

**डॉ. सुरेन्द्र पाल**
सह–आचार्य, व्याकरण
महर्षि वाल्मीकि संस्कृत विश्वविद्यालय, मून्दड़ी, कैथल

धर्मशब्दः व्याकरणस्य धृञ्–धारणे धातोः 'मन्' इति प्रत्ययं योजयित्वा निष्पन्नोर्भवति। ध्रियते लोकोऽनेन, धरति लोकं वा। अस्य मुख्याधारः यज्ञविधिः देवपूजा च आसीत् यज्ञः,दक्षिणां, देवता एतेषां भक्तिसम्बन्धि–सामग्री सूत्रेषु प्राप्यते। सहैव विविधदार्शनिक–सम्प्रदायानां भिक्षुणाश्च उल्लेखोऽपि प्राप्यते। एतेषां वैदिक–देवानां नामानि एवं सन्ति। यथा–

1. अग्नि – अस्य देवस्य नाम अष्टाध्यय्याः चतुर्थोऽध्यायस्य प्रथमपादस्य सप्तत्रिंशत्–सूत्रे प्राप्यते।[1]
2. इन्द्र–वरुण–भव–शर्व–रुद्र–मृडादयः इत्यादीनां देवानां नामानि अपि 'अष्टाध्यायी' इति ग्रन्थस्य चतुर्थोऽध्यायस्य प्रथमपादस्य एकोनपंचाशत्–सूत्रे प्राप्यते।[2]
3. 'वृषाकपि' इति देवस्य नामोल्लेखः प्राप्यते चतुर्थोऽध्यायस्य प्रथमपादस्य सप्तत्रिंशत्–सूत्रे प्राप्यते।[3]
4. पूषा–अर्यमा एतयोः देवयोः नामानि अष्टाध्याय्याः षष्ठोऽध्यायस्य चतुर्थपादस्य द्वादशसूत्रे वर्णनं प्राप्यते।[4]
5. 'त्वष्टा' इत्यस्य नाम षष्ठोऽध्यायस्य चतुर्थपादस्य एकादशसूत्रे प्राप्यते।[5]
6. 'सूर्य' इत्यस्य नामोल्लेखः प्राप्यते तृतीयोऽध्यायस्य प्रथमपादस्य चतुर्दशाधिकैकशतं सूत्रे।[6]
7. 'वायु' इति देवस्य नाम अष्टाध्याय्याः चतुर्थोऽध्यायस्य द्वितीयपादस्य त्रिंशत्सूत्रे प्राप्यते।[7]
8. 'महेन्द्र' इति देवस्य नाम्नः वर्णनमपि चतुर्थोऽध्यायस्य द्वितीयपादस्य अष्टाविंशतिस्सूत्रेऽस्ति।[8]

---

[1] वृषाकप्यग्निकुसितकुसीदानामुदात्तः । 4–1–37
[2] इन्द्रवरुणभवशर्वरूद्रमृड..................... । 4–1–49
[3] वृषाकप्य .................................... । 4–1–37
[4] इन् हन्पूषार्यम्णां शौ । 6–4–12
[5] अप् तन् तृच्स्वसृनप्तृ.................। 6–4–11
[6] राजसूयसूर्यमृषो ........................। 3–1–114
[7] वाय्वृतुपित्रुषसो यत्। 4–2–30
[8] महेन्द्राद् घणौ च। 4–2–28

9. 'सोमः' अस्य देवस्य वर्णनं चतुर्थोऽध्यायस्य द्वितीयपादस्य एकोनत्रिंशत्सूत्रेऽस्ति ।[1]

10. 'नासत्यः' इति देवस्य नाम अष्टाध्याय्याः षष्ठोऽध्यायस्य तृतीयपादस्य चतुस्सप्ततिः सूत्रे दृश्यते ।[2]

पाणिनिद्वारा नासत्यस्य व्युत्पत्तिः न+असत्यौ इति अमन्यत । अस्मिन् विषये प्राचीनकाले मतद्वयम् आसीत् । आचार्य–और्णवाभस्य मतमासीत् सत्यौ एव नासत्यावित्यौर्णवाभः । द्वितीयमतम् आसीत् यत् नासिकया उत्पत्तेः कारणात् ते नासत्यः इति वभूव ।

महाभारतस्य अनुशासनपर्वणि वर्णनं प्राप्यते यत् सूर्यस्य जाया संज्ञायाः नासिकायाः नासत्य–दस्र इति अश्विनी कुमारद्वयं जातम् आसीत् ।[3] प्रजापतेः देवस्य 'क' इति संज्ञया अकथयत् ।[4] महर्षि पतञ्जलेरनुसारं 'क' सर्वनाम् न भूत्वा देवस्य संज्ञास्ति । अतएव चतुर्थी–विभक्तौ कस्मै न भूत्वा, 'काय' इति रूपं भवति । वास्तोष्पति–गृहमेधः इति देवद्वयमपि उल्लेखः प्राप्यते । वास्तोष्पतिः तु ऋग्वेदकालीनदेवः आसीत् किन्तु गृहमेधः गृह्यसूत्रकालात् नूतनदेवस्य रूपे अमन्यत । गृह्यसूत्राणां युगे महेन्द्रेन्द्रयोः भेदोऽजायत । 'गोभिल' इति गृह्यसूत्रानुसारं पूर्वदिशः देवता इन्द्रः ईशानकोणस्य वा महेन्द्रदेवः कथ्यते स्म ।[5]

केचन यमकरूपेऽपि देवानां नामानि प्राप्यन्ते । यथा अष्टाध्याय्याः चतुर्थोऽध्यायस्य द्वितीयपादस्य एकस्त्रिंशत् सूत्रे 'अग्निषोम्' इति देवद्वयं वर्णनमस्ति ।[6] एवं अग्निवरुणश्चापि वर्णनं षष्ठोऽध्यायस्य तृतीयपादस्य षड्विंशतिः इति सूत्रे प्राप्यते ।[7] द्यावा पृथिवी चोल्लेखः अष्टाध्याय्याः चतुर्थोऽध्यायस्य द्वितीयपादस्य एकस्त्रिंशत् सूत्रे वर्तते ।[8]

'शुनासीरैः' इति देवद्वयस्य वर्णनं पाणिनेः अष्टाध्याय्याः चतुर्थोऽध्यायस्य द्वितीयपादस्य एकस्त्रिंशत्सूत्रे प्राप्यते ।[9] 'सोमारुद्र इन्द्रपूषा' इति देवानाम् उल्लेखः अष्टाध्याय्याः षष्ठोऽध्यायस्य द्वितीयपादस्य द्विचत्वारिंशदधिकैकशतं सूत्रे प्राप्यते ।[10] 'देवताद्वन्द्वे च' इत्यस्मिन् सूत्रे तेषां देवानां यमकम् अग्रह्णात् येषां वेदे सहाचर्यं प्रसिद्धमासीत् येषाञ्च लोकेऽपि एकेन सह मान्यता आसीत् । विशुद्ध–लौकिक–देवानां ग्रहणम् अत्र न कृतम्, किन्तु देवानामाधारे एव लोके नूतन–

---

[1] सोमाट् ट्यण् । 4–2–29

[2] नभ्राण्नपान्नवेदानासत्यानमुचिनकुल .............। 6–3–74

[3] महाभारत - अनु.पर्व. -150-17

[4] कस्येत् । 4-2-25

[5] गोभिलगृहसूत्रम् । 4-7-26-23

[6] द्यावापृथिवीशुनाशीर ..............। 4-2-31

[7] ईदग्नेः सोमवरुणयोः । 6-3-26

[8] द्यावापृथिवीशुनाशीर ..............। 4-2-31

[9] द्यावापृथिवीशुनाशीर ........गृहमेधाच्छ च । 4-2-31

[10] नोत्तरपदेनुदात्तादावपृथिवीरूद्रपूषमन्थिषु । 6-2-142

देवानां यमकानि दृश्यन्ते स्म, ये सहैव पूज्यन्ते स्म, यथा ब्रह्मप्रजापती–शिववैश्रवणौ–संकर्षणवासु देवौ इत्यादयः । एवं येषां साहचर्यं लोके प्रसिद्धम् आसीत्, तेषाम् अभिव्यक्तोऽकथयत् । द्वन्द्वशब्देन तेषामपि ग्रहणं भवति । अष्टाध्याय्याः द्वितीयोऽध्यायस्य चतुर्थपादस्य चतुर्दशसूत्रे पाणिनिना–ब्रह्माप्रजापती–शिववैश्रवणौ–स्कन्दविशाखौ एतेषां यमकानाम् उल्लेखो कृतः यत् ये गृह्यसूत्रयुगे नूतनलोकविज्ञातदेवाः अमन्यन्त प्राचीन–देवीषु इन्द्राणी–वरुणानी–अग्नायी–वृषाकपायी–पृथिवी–उषस् इत्यादीनां नामानां उल्लेखः प्राप्यते ।

ज्ञातं भवति यत् उषादेवतायै अपि सास्यदेवता प्रकरणे पृथक् हविषा पूजायाः प्रथा तत्कालं यावत् अवशिष्टासीत् ।

**उत्तरकालीनदेवता**

1. पार्वत्याः अथवा अम्बिकायाः चतुर्णां रूपाणाम् उल्लेखोऽस्ति – यथा अष्टाध्याय्याः चतुर्थाध्यायस्य प्रथमपादस्य एकोनपञ्चाशत् सूत्रे द्रष्टुं शक्यते ।[1]

विशेषतः सूत्रयुगे एतासां मान्यतासीत् । शतपथब्राह्मणानुसारं रूद्र–शर्व–भव एतानि अग्नेः रूपाणि सन्ति । येषां शर्व प्राच्यदेशे भव च वाहीकदेशे लोकप्रियः आसीत् ।[2] एवं रूद्राणी–मृडानी अपि स्थानीयानि नामानि भवितुमर्हन्ति ।

अष्टाध्याय्याः चतुर्थोऽध्यायस्य प्रथमपादस्य पञ्चाशीतिस्सूत्रे आदित्योल्लेखः प्राप्यते ।[3] सः वैदिकादित्य–देवतायाः अपेक्षा सूत्रयुगस्य देवता प्रतीयते । वस्तुतः पाणिनिकालस्य एका धार्मिकविशेषता ध्यातव्याऽस्ति यत् कालवाचिशब्दैः अभिहितः नूतनदेवानां मान्यतायाः पूजायाश्च आरम्भो जातः ।

चतुर्थोऽध्यायस्य द्वितीयपादस्य चतुस्त्रिंशत्सूत्रे सास्यदेवता प्रकरणे अनेककालवाचिशब्दान् देवता अमन्यत । यथा तत् स्थालीपाकहविः यस्य मासदेवताऽस्ति मासिकं कथ्यते एवं अर्धमासदेवतायाः हविः आर्धमासिकं, संवत्सरस्य सांवत्सरिकं, वसन्तऋतोः वासन्तिकं, प्रावृष्ऋतोः प्रावृषेण्यं कथ्यते स्म । इत्थं मास–ऋतु–संवत्सर एतेषां कृते नूतनपदं प्राप्तं लोके च तेषां पूजा प्रारब्धा । चतुर्थोऽध्यायस्य द्वितीयपादस्य त्रिंशत्सूत्रे पाणिनिः ऋतुं देवता अकथयत् ।[4] देवत्वप्रदानस्य एषा नूतनपद्धतिः एतावती वर्धिता यत् यावन्ति नक्षत्राणि आसन् तेऽपि देवताऽमन्यन्त । इत्यस्मिन् सूत्रे नक्षत्रं स्पष्टरूपेण देवताऽकथयत् ।[5]

प्रोष्ठपद–देवतायाः उद्देश्येन समर्पितं हविः प्रोष्ठपरिकं कथ्यते स्म । नक्षत्राणां देवता स्वीकृतः महत्त्वपूर्ण–परिणामः मनुष्याणां नामसु अभवत् येषां विवरणं सूत्रकारः विस्तारेण दत्तम् । एतेषां नक्षत्रणां ये अधिष्ठातृदेवाऽऽसन्, तेषां प्रसादेन

---

[1] इन्द्रवरूणभव ...............आचार्याणानुक् ।4-1-49

[2] शर्व इति यथा प्राच्या आचक्षते भव इति यथा वाहीकाः । शत.- 1-7-3-8

[3] दिव्यदित्यादित्यपत्युत्तरपदाण्ण्यः । 4-1-85

[4] वाय्वृतुपित्रुषसः । 4-2-30

[5] महाराजप्रोष्ठपदाट् ठञ् । 4-2-34

इष्टस्य इच्छुकाः पितरौ निज–सन्ततेर्नाम तेषां नक्षत्राणां नाम्ना कुर्वन्ति स्म । तेषाञ्च कृते काले–काले हविः अर्पितं कुर्वन्त स्म । पुष्यदत्त–स्वातिदत्त–तिष्यरक्षित इत्यादीनि नामानि एवं सन्ति ।

अष्टाध्याय्याः अष्टमोऽध्यायस्य तृतीयपादस्य शतं सूत्रे अन्तर्निहितानि नामान्यपि अस्यां श्रेण्याम् आयान्ति ।[1] यथा – रोहिणिषेण–भरणिषेण– शतभिषक्सेण इत्यादयः ।

भक्तिः – देवानां विषये उपरि लिखितं दृष्टिकोणं धर्मस्य क्षेत्रे महत्त्वपूर्ण–परिवर्तनस्य सूचकमस्ति । पाणिनेः अष्टाध्याय्याः पञ्चमोऽध्यायस्य तृतीयपादस्य चतुरशीतिः सूत्रे[2] आगतानि नामानि (वरुणदत्त–अर्यमादत्त) सूचयन्ति यत् वरुणः अर्यमा च देवयोः भक्तया प्रसन्नोभूत्वा पितरौ तयोः कृपया पुत्रलाभे विश्वसन्ति स्म ।

पाणिनिः लिखन्ति यत् नाम्नाम् अन्ते दत्त इति उत्तरपदं देवस्य आशीर्वादस्य सूचकम् अमन्यत ।[3] पाणिनेः युगे भक्तिधर्मस्योदयः भारतवर्षस्य धार्मिकेतिहासस्य अतीव महत्त्वपूर्णा घटना कथ्यते । वैदिक यज्ञेषु या पुरातनकालस्य आस्थाऽऽसीत् तया सह एकं प्रतिद्वन्द्वी–दृष्टिकोणमपि अमन्यत । अयं विशेषदेवानां विश्वासः आसीत् येन देवं प्रसन्नं कृत्वा तस्य वरदानं प्राप्तुं शक्यते । अनेन लोके कोटिशः देवास्सन्ति तेषां पदप्रतिष्ठा वर्धिता । फलतः यक्ष–नाग–भूत–पिशाच–ग्रह–रुद्र–देवी–वृक्ष–नदि–गिरि इत्यादीन् देवं मत्वा तान् पूजनस्य या परम्परा लोके अचलत् तां सार्वजनिकरूपेण मान्यता प्राप्ता । उच्चवर्णानां गृहेषु अपि एतेषां देवानां निर्बाधरूपेण प्राविशत् ।

भक्तिधर्मोदयस्य द्वितीयप्रभावः पुजारीपद्धतौ अभवत् । यज्ञविधेः निजपृथक् मार्गः आसीत् । तस्मिन् पुष्प–फल–नैवेद्य–धूप–दीप–पत्र–वाद्य–नृत्य–गीत–बलि इत्यादीनां प्रथा नासीत् । किन्तु लोके यज्ञादेः देवानां या पूजाऽऽसीत् तस्य स्वरूपं सम्यक् रूपेण एतैः वस्तुभिः निर्मीयते स्म ।

भक्तिधर्मस्य तृतीयप्रभावोऽयम् अभवत् यत् पुरुषविशेषदेवस्य रूपे अपूजयन् । अन्यत् प्रकारेण बौद्धजनाः महावीर जनाश्च तेषां कृते स्तूपादि–चिह्नानां संकल्प्य धर्मस्य बाह्यरूपं स्थापितम् ।

पाणिनिः अष्टाध्याय्याः चतुर्थोऽध्यायस्य तृतीयपादस्य अष्टनवतिः सूत्रे एवं भक्तजनानाम् उल्लेखम् अकरोत् ।[4] यथा वासुदेवस्य भक्तजनाः वासुदेवकः अकथयन् । यथा बौद्धधर्मे साप्तमानुषी–बुद्धानां कल्पनासीत् , जैनधर्मे पञ्चमुख्य–तीर्थकराणां कल्पनाऽऽभवत् । भक्तजनाः एतेषां विकल्पद्वयम् अस्थापयत् । एकस्तु कृष्णेन सह तस्य राजस्–जीवनस्य अभिन्नसखा अर्जुनस्य पूजाऽऽसीत् । वासुदेवस्य भक्ताः यथा वासुदेवकः अकथयन् , तथैव अर्जुनस्य भक्ताः अर्जुनकः अकथयन् । वासुदेवार्जुनयोः अस्य धार्मिक–साहचर्यस्यैव द्वितीयरूपं नरनारायणयोः सहयुक्तपूजाऽऽसीत् । महाभारतस्य

---

[1] नक्षत्राद् वा । 8-3-100

[2]

[3] कारका द्दत्त श्रुतयोरेवाशिषि । 6-2-148

[4] वासुदेवार्जुननाभ्यां वुन् । 4-3-98

शान्तिपर्वणि नारायणीयधर्मस्य विशेषरूपेण वर्णनमस्ति । ऐतिहासिकदृष्ट्या तस्य आरम्भः आस्मिन् युगे भवेत् । वासुदेवार्जुनयोः नामान्तरैव नारायणोऽस्ति । पाणिनिः षष्ठोऽध्यायस्य तृतीयपादस्य षड्विंशतिः सूत्रे देवयमकस्य वर्णनमकरोत् ।[1] सूत्रेण ज्ञायते यत् देवानां यमकं साहचर्यस्य वा विश्वासो वैदिकदेवानां विषयेऽपि आसीत् । यथा – इन्द्रासोमौ , इन्द्राबृहस्पती ।

पाणिनेः युगे कृष्णवासुदेवस्य भक्तेः विकासं प्राचीनार्वाचीनाश्च । सर्वे विद्वांसः स्वीकृतम् । पतञ्जलिः "संज्ञा चैषा तत्रभवतः" इति लिखित्वा वासुदेवं विष्णोः स्वरूपम् अमन्यत् । कैयटः तं परमात्मदेवताविशेषोऽकथयत् । पतञ्जलेः प्राक् कृष्णस्य जीवन लीलानां विकासोऽभवत् । यथा सोऽलिखत् "जघान कंसं किलवासुदेवः" ।

पश्चिमी–विद्वांसोऽपि पाणिनेः उल्लेखं भागवतधर्मस्य प्राचीनतायां प्रमाणं मन्यन्ते । कीथः पतञ्जलेः "संज्ञा चैषा तत्रभवतः" कथनस्य यथार्थं स्वीकुर्वन् अलिखत् यत् निश्चयेनैव पाणिनेः समये वासुदेवकृष्णं विष्णोः अवतारः अमन्यत ग्रिथर्सनः पाणिनेः उल्लेखाधारे भागवतधर्मस्य प्राचीनतां निर्विवादम् अकथयत् ।

महाराजः – अयं शब्दः प्राचीनभारतीय–लोकधर्मस्य एकमहत्वपूर्णोऽध्यायो दृष्टिपथम् आयाति । पाणिनिः चतुर्थोऽध्यायस्य द्वितीयपादस्य पञ्चत्रिंशद् इति सूत्रे महाराजं देवता अकथयत् ।[2] (महाराजो देवता अस्य महाराजिकं हविः) एकस्मिन् सूत्रे महाराजः देवभक्तेरपि उल्लेखोऽस्ति ।[3] महाराजो भक्तिरस्य माहाराजिकः । महाराजदेवतायाः भक्ताः महाराजिकाः अकथयत् ।

पतञ्जलिः महाराजं देवतायै अर्पिता बलिं महाराजबलिरकथयत् ।[4] यो हि महाराजाय बलिर्महाराजार्थः सो भवति । यक्षाणां राजा कारणात् कुबेरः महाराजा अकथयत् । कालिदास इममेव राजराजोऽकथयत् ।[5] यक्ष–गन्धर्व–कुभाण्ड–नाग एते चत्वारः प्राचीन–लोकेदेवाः आसन् येषां व्यापकमान्यताऽऽसीत् । एतेषां चतुर्णाम् अधिपतिः क्रमशः कुबेरः, धृतराष्ट्रः, विरूढकः, विरूपाक्षः महाराजनाम्ना प्रसिद्धोऽभवन् । जातके वैश्रवकुबरं महाराजोऽकथयत् ।[6] गृह्यसूत्रेष्वपि महाराजस्य पूजायाः उल्लेखः आयाति । प्रायः प्रतिगृह्यहविषः अन्ते वैश्रवणस्य स्तुतेः मन्त्रम् उच्चघोषेण पठ्यते स्म यस्मिन् तं यक्षाधिपतिरकथयत् ।[7]

---

1 देवता द्वन्द्वे च । 6-3-26

2 महाराज प्रोष्ठपदाद्ठञ् । 4-2-35

3 महाराजाद्ठञ् । 4-3-97

4 पतञ्जलि महाभाष्यम् । 2-1-36, वा.2

5 मेघ.(कालिदास)। 1-3

6 जातक। 6-265

7 राजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे।
स मे कामान् कामकामाय मह्यं कामेश्वरो वै वैश्रवणो दधातु ।।

प्रतिकृतिः – चित्राणि येषु देवचित्राणि अपि सम्मिलितास्सन्ति । प्रतिकृतिरकथयत् । पाणिनेः अष्टाध्याय्याः पञ्चमोऽध्यायस्य तृतीयपादस्य षण्णवतिः सूत्रे 'अर्चा' शब्दः अस्मिनेव अर्थे प्रयुक्तोऽभवत् ।[1] मूर्तिस्थापिता अर्चकः "अर्चावान् या आर्च" अकथयत् ।[2] पतञ्जलिरपि देवमूर्तये अर्चा इति शब्दस्य प्रयोगोऽकरोत् ।[3]

इत्थं पाणिनिः सूत्रैः अनेकदेवानां वर्णनं कृत्वा इदं स्पष्टमकरोत् यत् अष्टाध्याय्यां वर्णितानि सूत्राणि न केवलं व्याकरणिकदृष्ट्या महत्वपूणानि सन्ति अपितु तात्कालिकसमाजस्य चित्रणमपि सूत्रैः मुनिना कृतम् । अतः सूत्राणाम् अध्ययनं कृत्वा तात्कालिकसमाजस्य ज्ञानमपि वयं कर्तुं शक्नुमः एवं अस्य ग्रन्थस्य महत्त्वम् अधिकं वर्धते ।

---

1 5-3-96

2 5-2-101

3 मौर्यैः हिरण्यार्थिभिः अर्चाः प्रकल्पिताः । 5-3-99